# Shri Ramanamaharshi Sahasranamavali

# श्रीरमणमहर्षिसहस्रनामावलिः

## Document Information

Text title : Shri Ramana Sahasranamavali

File name : ramaNasahasranAmAvalI.itx

Category : sahasranAmAvalI, deities_misc, ramaNa-maharShi, nAmAvalI, jagadIsha-shAstrI, gurudev

Location : doc_deities_misc

Author : Jagadisha Sastri

Transliterated by : Sunder Hattangadi

Proofread by : Lingeshwara Rao (from original in Telugu) Sunder Hattangadi

Source : ISBN 81-85378-60-6

Acknowledge-Permission: Sri V.S. Ramanan, President, Sri Ramanasramam sriramanamaharshi.org

Latest update : March 31, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# श्रीरमणमहर्षिसहस्रनामावलिः

देव्युवाच -
भगवन्सर्वशास्त्रार्थपरिज्ञानवतां वर ।
अरुणेशस्य माहात्म्यं त्वत्तो विस्तरशः श्रुतम् ॥ १॥

तन्नाम्नामपि साहस्रं सर्वपापहरं नृणाम् ।
अरुणेशावतारस्य रमणस्य महात्मनः ॥ २॥

इदानीं श्रोतुमिच्छामि तस्य नामसहस्रकम् ।
यस्य सङ्कीर्तनान्मर्त्यो विमुक्तिं विन्दते ध्रुवम् ॥ ३॥

त्वं तु सर्वं विजानासि नान्यस्त्वत्तोऽस्य वेदिता ।
तस्मात्कारुण्यतो मह्यं भक्तिमत्यै विशेषतः ॥ ४॥

नाम्नां सहस्रं दिव्यानां रमणस्य मुनीशितुः ।
रहस्यमपि वक्तव्यं त्वया गौतम सुव्रत ॥ ५॥

गौतम उवाच -
साधु साधु महाभागे प्रश्न एष जगद्धितः ।
वक्ष्ये तच्छ्रद्धयोपेता सावधानमनाः शृणु ॥ ६॥

ज्ञानं वेदान्तसञ्जातं साक्षान्मोक्षस्य साधनम् ।
कर्मोपास्त्यादि तद्भिन्नं ज्ञानद्वारैव मुक्तिदम् ॥ ७॥

निष्कामकर्मशुद्धानां विवेकादिमतां नृणाम् ।
जायते तच्च विज्ञानं प्रसादादेव सद्गुरोः ॥ ८॥

ज्ञानसाधननिष्ठत्वं ज्ञानाभ्यासं विदुर्बुधाः ।
तारतम्येन भिद्यन्ते ज्ञानाभ्यासाधिकारिणः ॥ ९॥

विचारमात्रनिष्ठस्य मुख्या ज्ञानाधिकारिता ।
विचारी दुर्लभो लोके विचारो दुष्करो यतः ॥ १०॥

मुमुक्षवो नरास्सर्वे ज्ञानाभ्यासेऽधिकारिणः ।
स्त्रीशूद्राणां तथान्येषां नाधिकारो विगर्हितः ॥ ११॥

देशभाषान्तरेणापि तेषां सोप्युपकारकः ।
ज्ञानस्य च विचारोऽयं सन्निकृष्टं हि साधनम् ॥ १२॥

विचारभिन्नमार्गश्च न साक्षाज्ज्ञानसिद्धये ।
विचारजननद्वारेत्याहुर्वेदान्तवेदिनः ॥ १३॥

योगोपास्त्यादयोप्यन्ये सन्ति विज्ञानहेतवः ।
तदालम्बो भवत्येव विचारानधिकारिणाम् ॥ १४॥

योगोपास्त्याद्यशक्तानां जपस्तुत्यादिकीर्तनम् ।
ज्ञानोपायोभवत्येव जिज्ञासानिष्ठितं यदि ॥ १५॥

तस्मादयत्नतोज्ञानं सर्वेषां येन हेतुना ।
तादृशं नामसाहस्रं रमणस्य महात्मनः ॥ १६॥

त्वयि प्रीत्यैव वक्ष्यामि हिताय जगतां शृणु ।
नाभक्ताय प्रदातव्यमिदं मोक्षसुखप्रदम् ॥ १७॥

अस्य श्रीरमणदिव्यसहस्रनामस्तोत्रमहामन्त्रस्य ।
गौतमो ऋषिः । अनुष्टुप्छन्दः । श्रीरमणपरमात्मादेवता ।
ऐं बीजम् । ह्रीं शक्तिः । श्रीं कीलकम् ।
“श्रीरमणाय नमः” इति मन्त्रप्रत्येकवर्णेन हृदयादि न्यासः ।
ॐ भूर्भुवस्स्वरोमिति दिग्बन्धः ।

ध्यानम्

ध्यायेच्छारदचन्द्रसुन्दरमुखं ताम्रारविन्देक्षणं
भक्ताभीष्टवराभयप्रदकरं कौपीनमात्रोज्ज्वलम् ।
स्वात्मानन्दरसानुभूतिविवशं सर्वानवद्याङ्गकं
श्रीमन्तं रमणेश्वरं गुरुवरं योगासनाध्यासितम् ॥

अरुणजलजनेत्रं मुग्धमन्दस्मितास्यं
तरुणतपनभासं पूर्णबोधप्रसादम् ।
अरुणशिखरिसानुप्राङ्गणे सञ्चरन्तं
रमणमरुणमूर्तिं चिन्तयेदिष्टसिद्ध्यै ॥

ॐ अरुणेशमहाशक्तिनिपातप्रतिबोधिताय नमः ।

ॐ अचिन्त्यपरनिर्वाणस्थितये नमः ।
ॐ अव्यक्तशक्तिकाय नमः ।
ॐ अनभ्यासश्रमावाप्तसमस्तनिगमागमाय नमः ।
ॐ अरुणाचलनाथीय पञ्चरत्नप्रकाशकाय नमः ।
ॐ अनाहतान्यहृदयस्थानबोधनपण्डिताय नमः ।
ॐ अकारादिक्षकारान्तमातृकामन्त्रमालिकाय नमः ।
ॐ अन्तर्गतमहाशक्तये नमः ।
ॐ अणिमादिगुणान्विताय नमः ।
ॐ अभ्यासातिशयज्ञाताय नमः ॥

ॐ अत्याश्चर्यचरित्रकाय नमः ।
ॐ अतिवर्णाश्रमाचाराय नमः ।
ॐ अचिन्त्यशक्तये नमः ।
ॐ अमोघदृशे नमः ।
ॐ अङ्गावन्त्यादिदेशीय मुमुक्षुजनताश्रयाय नमः ।
ॐ अन्तर्मुखाय नमः ।
ॐ अन्तरारामाय नमः ।
ॐ अन्तर्यामिने नमः ।
ॐ अहमर्थदृशे नमः ।
ॐ अहमर्थैकलक्ष्यार्थाय नमः ॥

ॐ अरुणाद्रिमयाय नमः ।
ॐ अरुणाय नमः ।
ॐ अपीताम्बाङ्गनिर्माल्यपयःपानैकजीविताय नमः ।
ॐ अध्यात्मयोगनिलयाय नमः ।
ॐ अदीनात्मने नमः ।
ॐ अघमर्षणाय नमः ।
ॐ अकायाय नमः ।
ॐ भक्तकायस्थाय नमः ।
ॐ कालचक्रप्रवर्तकाय नमः ।
ॐ अक्षिपेयामृताम्बोधये नमः ॥

ॐ आढ्यैश्वर्यदायकाय नमः ।
ॐ आजानुबाहवे नमः ।

ॐ अक्षोभ्याय नमः ।
ॐ आत्मवते नमः ।
ॐ अनसूयकाय नमः ।
ॐ आवर्तक्षेत्रसञ्जाताय नमः ।
ॐ आर्तरक्षणतत्पराय नमः ।
ॐ इतिहासपुराणज्ञाय नमः ।
ॐ इष्टापूर्तफलप्रदाय नमः ।
ॐ इडापिङ्गलिकामध्यसुषुम्नाग्रन्थिभेदकाय नमः ॥

ॐ इडापिङ्गलिकामध्यसुषुम्नामध्यभासुराय नमः ।
ॐ इष्टार्थदाननिपुणाय नमः ।
ॐ इन्द्रभोगविरक्तधिये नमः ।
ॐ ईशानाय नमः ।
ॐ ईषणाहीनाय नमः ।
ॐ ईतिबाधाभयापहाय नमः ।
ॐ उपास्यमूर्तये नमः ।
ॐ उत्साहसम्पन्नाय नमः ।
ॐ उरुविक्रमाय नमः ।
ॐ उदासीनवदासीनाय नमः ॥ ५०
ॐ उत्तमज्ञानदेशिकाय नमः ।
ॐ ऊर्ध्वरेतसे नमः ।
ॐ ऊर्ध्वगतये नमः ।
ॐ उटजस्थाय नमः ।
ॐ उदारधिये नमः ।
ॐ ऋषये नमः ।
ॐ ऋषिगणस्तुत्याय नमः ।
ॐ ऋजुबुद्धये नमः ।
ॐ ऋजुप्रियाय नमः ।
ॐ ऋतम्भराय नमः ॥

ॐ ऋतप्रज्ञाय नमः ।
ॐ ऋजुमार्गप्रदर्शकाय नमः ।
ॐ एवमित्यविनिर्णेयाय नमः ।

ॐ एनःकूटविनाशनाय नमः ।
ॐ ऐश्वर्यदाननिपुणाय नमः ।
ॐ औदार्यगुणमण्डिताय नमः ।
ॐ ओङ्कारपदलक्ष्यार्थाय नमः ।
ॐ औपम्यपरिवर्जिताय नमः ।
ॐ कटाक्षस्यन्दिकरुणाय नमः ।
ॐ कटिबद्धालमल्लकाय नमः ॥

ॐ कमनीयचरित्राढ्याय नमः ।
ॐ कर्मविदे नमः ।
ॐ कविपुङ्गवाय नमः ।
ॐ कर्माकर्मविभागज्ञाय नमः ।
ॐ कर्मलेपविवर्जिताय नमः ।
ॐ कलिदोषहराय नमः ।
ॐ कम्राय नमः ।
ॐ कर्मयोगप्रवर्तकाय नमः ।
ॐ कर्मन्दिप्रवराय नमः ।
ॐ कल्याय नमः ॥

ॐ कल्याणगुणमण्डिताय नमः ।
ॐ कान्तिपत्तनसन्दृष्टारुणज्योतिःप्रहर्षिताय नमः ।
ॐ कामहन्त्रे नमः ।
ॐ कान्तमूर्तये नमः ।
ॐ कालात्मने नमः ।
ॐ कालसूत्रहृते नमः ।
ॐ काङ्क्षाहीनाय नमः ।
ॐ कालकाङ्क्षिणे नमः ।
ॐ काशीवासफलप्रदाय नमः ।
ॐ काश्मीरदेश्यसेव्याङ्घ्रये नमः ॥

ॐ नेपालीयसमर्चिताय नमः ।
ॐ कामकारनिराकर्त्रे नमः ।
ॐ कृतकृत्यत्वकारकाय नमः ।
ॐ काव्यकण्ठसुधीदृष्ट कार्तिकेयस्वरूपधृते नमः ।

ॐ किङ्करीकृत भूपालाय नमः ।
ॐ कीर्तिमते नमः ।
ॐ कीर्तिवर्धनाय नमः ।
ॐ कुमाराय नमः ।
ॐ कुतलामोदाय नमः ।
ॐ कुकुटुम्बिने नमः ॥ १००
ॐ कुलोद्भताय नमः ।
ॐ कुष्ठापस्माररोगघ्नाय नमः ।
ॐ कुसुमारामनिष्ठिताय नमः ।
ॐ कृपाळवे नमः ।
ॐ कृपणालम्बाय नमः ।
ॐ कृशानुसदृशाय नमः ।
ॐ कृशाय नमः ।
ॐ केरलान्ध्रादिभाषज्ञाय नमः ।
ॐ केरलान्ध्रजनेडिताय नमः ।
ॐ कैवल्यपदनिश्रेणये नमः ॥

ॐ कैवल्यसुखदायकाय नमः ।
ॐ कोऽहं नाहं सोऽहमिति स्वात्मान्वेषणमार्गदृशे नमः ।
ॐ कोऽहंविमर्शब्रह्मास्त्रनाशिताशेषविभ्रमाय नमः ।
ॐ कोशालयप्रतिष्ठात्रे नमः ।
ॐ कोशवते नमः ।
ॐ कोशवीक्षित्रे नमः ।
ॐ क्षमावते नमः ।
ॐ क्षिप्रसन्तुष्टाय नमः ।
ॐ क्षपिताशेषकल्मषाय नमः ।
ॐ क्षतकर्मणे नमः ॥

ॐ क्षतविद्याय नमः ।
ॐ क्षीणभक्तजनावनाय नमः ।
ॐ क्षामनाशिने नमः ।
ॐ क्षुधाहीनाय नमः ।
ॐ क्षुद्रघ्नाय नमः ।

ॐ क्षितिमण्डनाय नमः ।
ॐ क्षेत्रज्ञाय नमः ।
ॐ क्षेमदाय नमः ।
ॐ क्षेमाय नमः ।
ॐ क्षेमार्थिजनवन्दिताय नमः ॥

ॐ क्षेत्राटनपरिश्रान्तभक्तक्षिप्रप्रसादनाय नमः ।
ॐ क्ष्म्रौं मन्त्रबीजतत्त्वज्ञाय नमः ।
ॐ क्षेत्राजीवफलप्रदाय नमः ।
ॐ गम्भीराय नमः ।
ॐ गर्विताय नमः ।
ॐ गर्वविहीनाय नमः ।
ॐ गर्वनाशनाय नमः ।
ॐ गद्यपद्यप्रियाय नमः ।
ॐ गम्याय नमः ।
ॐ गायत्रीमन्त्रबोधिताय नमः ॥

ॐ गिरीशाय नमः ।
ॐ गीष्पतये नमः ।
ॐ गुण्याय नमः ।
ॐ गुणातीताय नमः ।
ॐ गुणाकराय नमः ।
ॐ गृहिणे नमः ।
ॐ गृहविनिर्मुक्ताय नमः ।
ॐ ग्रहातिग्रहसञ्जयिने नमः ।
ॐ गीतोपदेशसारादि ग्रन्थकृते नमः ।
ॐ ग्रन्थिभेदकाय नमः ॥ १५०
ॐ गुरुमूर्ततपोनिष्ठाय नमः ।
ॐ नैसर्गिकसुहृद्वराय नमः ।
ॐ गृहिमुक्त्यधिकारित्वव्यवस्थापनतत्पराय नमः ।
ॐ गोविन्दाय नमः ।
ॐ गोकुलत्रात्रे नमः ।
ॐ गोष्ठीवते नमः ।

ॐ गोधनान्विताय नमः ।
ॐ चराचरहिताय नमः ।
ॐ चक्षुरुत्सवाय नमः ।
ॐ चतुराय नमः ॥

ॐ चलाय नमः ।
ॐ चतुर्वर्गचतुर्भद्रप्रदाय नमः ।
ॐ चरमदेहभृते नमः ।
ॐ चाण्डालचटकश्वाहिकिटिकीशहितङ्कराय नमः ।
ॐ चित्तानुवर्तिने नमः ।
ॐ चिन्मुद्रिणे नमः ।
ॐ चिन्मयाय नमः ।
ॐ चित्तनाशकाय नमः ।
ॐ चिरन्तनाय नमः ।
ॐ चिदाकाशाय नमः ॥

ॐ चिन्ताहीनाय नमः ।
ॐ चिदूर्जिताय नमः ।
ॐ चोरहणे नमः ।
ॐ चोरदृशे नमः ।
ॐ चोरचपेटाघातनन्दिताय नमः ।
ॐ छलच्छद्मवचोहीनाय नमः ।
ॐ शत्रुजिते नमः ।
ॐ शत्रुतापनाय नमः ।
ॐ छन्नाकाराय नमः ।
ॐ छान्दसेड्याय नमः ।
ॐ छिन्नकर्मादि बन्धनाय नमः ।
ॐ छिन्नद्वैधाय नमः ।
ॐ छिन्नमोहाय नमः ।
ॐ छिन्नहृदे नमः ।
ॐ छिन्नकल्मषाय नमः ।
ॐ जगद्गुरवे नमः ।
ॐ जगत्प्राणाय नमः ।

ॐ जगदीशाय नमः ।
ॐ जगत्प्रियाय नमः ।
ॐ जयन्तीजाय नमः ।
ॐ जन्महीनाय नमः ।
ॐ जयदाय नमः ।
ॐ जनमोहनाय नमः ।
ॐ जाग्रत्स्वप्नसुषुप्त्यादि साक्षिणे नमः ।
ॐ जाड्यविनाशकाय नमः ।
ॐ जातिवर्णभिदाशून्याय नमः ।
ॐ जितात्मने नमः ।
ॐ जितभूतकाय नमः ।
ॐ जितेन्द्रियाय नमः ।
ॐ जितप्राणाय नमः ॥ २००
ॐ जितान्तःशत्रुसञ्चयाय नमः ।
ॐ जीवब्रह्मैक्यविदे नमः ।
ॐ जीवन्मुक्ताय नमः ।
ॐ जीवत्वनाशकाय नमः ।
ॐ ज्योतिर्लिङ्गमयज्योतिषे नमः ।
ॐ समलोष्टाश्मकाञ्चनाय नमः ।
ॐ जेत्रे नमः ।
ॐ ज्यायसे नमः ।
ॐ ज्ञानमूर्तये नमः ।
ॐ ज्ञानिने नमः ॥

ॐ ज्ञानमहानिधये नमः ।
ॐ ज्ञानज्ञातृज्ञेयरूपत्रिपुटी भावनोज्झिताय नमः ।
ॐ ज्ञातसर्वागमाय नमः ।
ॐ ज्ञानगम्याय नमः ।
ॐ ज्ञातेयसन्नुताय नमः ।
ॐ ज्ञानविज्ञानतृप्तात्मने नमः ।
ॐ ज्ञानसञ्छिन्नसंशयाय नमः ।
ॐ ज्ञानाग्निदग्धकर्मणे नमः ।

ॐ ज्ञानोपायप्रदर्शकाय नमः ।
ॐ ज्ञानयज्ञविधिप्रीताय नमः ॥

ॐ ज्ञानावस्थितमानसाय नमः ।
ॐ ज्ञाताऽज्ञातान्यचिन्मात्राय नमः ।
ॐ ज्ञानवृद्धोपलालिताय नमः ।
ॐ तत्त्वज्ञाय नमः ।
ॐ तत्त्वविन्नेत्रे नमः ।
ॐ तत्त्वमस्यादिलक्षिताय नमः ।
ॐ तत्त्वभाषणसन्तुष्टाय नमः ।
ॐ तत्त्वबोधकदेशिकाय नमः ।
ॐ तत्पदार्थैकसंलीनाय नमः ।
ॐ तत्त्वान्वेषणतत्पराय नमः ॥

ॐ तपनाय नमः ।
ॐ तपनीयाङ्गाय नमः ।
ॐ तमस्सन्तापचन्द्रमसे नमः ।
ॐ तपस्विने नमः ।
ॐ तापसाराध्याय नमः ।
ॐ तपःक्लिष्टतनूद्वहाय नमः ।
ॐ तपस्तत्त्वार्थसारज्ञाय नमः ।
ॐ तपोमूर्तये नमः ।
ॐ तपोमयाय नमः ।
ॐ तपोबलसमाकृष्ट भक्तसङ्घसमावृताय नमः ॥

ॐ तापत्रयाग्निसन्तप्त जनसञ्जीवनामृताय नमः ।
ॐ तातादेशाप्तशोणाद्रये नमः ।
ॐ तातारुणमहेश्वराय नमः ।
ॐ तातान्तिकसमागन्त्रे नमः ।
ॐ तातान्वेषणतत्पराय नमः ।
ॐ तितिक्षवे नमः ।
ॐ तीर्थविदे नमः ।
ॐ तीर्थाय नमः ।
ॐ तुरीयाय नमः ।

ॐ तुष्टमानसाय नमः ॥ २५०
ॐ तुल्यनिन्दास्तुतये नमः ।
ॐ तूष्णींशीलाय नमः ।
ॐ तृष्णाविवर्जिताय नमः ।
ॐ तेजस्विने नमः ।
ॐ त्यक्तविषयाय नमः ।
ॐ त्रयीभावार्थकोविदाय नमः ।
ॐ त्रिदिवेशमुखोपास्याय नमः ।
ॐ त्रिवर्गाय नमः ।
ॐ त्रिगुणात्मकाय नमः ।
ॐ त्रैलोक्यबुधसम्पूज्याय नमः ॥

ॐ त्रैलोक्यग्रासबृंहिताय नमः ।
ॐ त्रैलोक्यसृष्टिस्थितिकृते नमः ।
ॐ त्रैगुण्यविषयोज्झिताय नमः ।
ॐ त्रैगुण्यविषवेगघ्नाय नमः ।
ॐ दक्षाय नमः ।
ॐ दग्धवपुर्धराय नमः ।
ॐ दर्शनीयाय नमः ।
ॐ दयामूर्तये नमः ।
ॐ दक्षिणास्याय नमः ।
ॐ दमान्विताय नमः ।
ॐ दण्डधृते नमः ।
ॐ दण्डनीतिस्थाय नमः ।
ॐ दक्षिणाय नमः ।
ॐ दम्भवर्जिताय नमः ।
ॐ दहराकाशमध्यस्थ चिदाकाशप्रतिष्ठिताय नमः ।
ॐ दशदिक्पालसम्पूज्याय नमः ।
ॐ दशदिग्व्यापिसद्यशसे नमः ।
ॐ दक्षिणद्वीपविख्याताय नमः ।
ॐ दाक्षिणात्यकलाकवये नमः ।
ॐ दारिद्र्यध्वंसकाय नमः ॥

ॐ दान्ताय नमः ।
ॐ दारितक्लेशसन्ततये नमः ।
ॐ दासीदासभराय नमः ।
ॐ दिव्याय नमः ।
ॐ दिष्ट्याबुद्धाय नमः ।
ॐ दिगम्बराय नमः ।
ॐ दीर्घदर्शिने नमः ।
ॐ दीप्यमानाय नमः ।
ॐ दीनबन्धवे नमः ।
ॐ दृगात्मकाय नमः ॥

ॐ दृग्दृश्यभेदधीशून्याय नमः ।
ॐ दर्शनाय नमः ।
ॐ दृप्तखण्डकाय नमः ।
ॐ देववन्द्याय नमः ।
ॐ देवतेशाय नमः ।
ॐ दोषज्ञाय नमः ।
ॐ दोष नाशनाय नमः ।
ॐ द्वादशार्णमनुध्येयाय नमः ।
ॐ द्वादशान्तस्थलस्थिताय नमः ।
ॐ दुर्विगाह्याय नमः ॥ ३००
ॐ दुराधर्षाय नमः ।
ॐ दुराचारनिवर्तकाय नमः ।
ॐ दैविकाय नमः ।
ॐ द्राविडाय नमः ।
ॐ द्वीपान्तरविख्यातवैभवाय नमः ।
ॐ द्वितीयातिथिसम्भूताय नमः ।
ॐ द्वैतभावविमुक्तधिये नमः ।
ॐ द्वैताद्वैतमतातीताय नमः ।
ॐ द्वैतसन्तमसापहाय नमः ।
ॐ धनदाय नमः ॥

ॐ धर्मसूक्ष्मज्ञाय नमः ।

ॐ धर्मराजे नमः ।
ॐ धार्मिकप्रियाय नमः ।
ॐ धात्रे नमः ।
ॐ धातृसमस्त्रीकाय नमः ।
ॐ धातुशुद्धिविधायकाय नमः ।
ॐ धारणाशक्तिमते नमः ।
ॐ धीराय नमः ।
ॐ धुरीणाय नमः ।
ॐ धृतिवर्धनाय नमः ॥

ॐ धीरोदात्तगुणोपेताय नमः ।
ॐ ध्याननिष्ठाय नमः ।
ॐ ध्रुवस्मृतये नमः ।
ॐ नमज्जनोद्धारणकृते नमः ।
ॐ नरवाहनसन्निभाय नमः ।
ॐ नवनीतसमस्वान्ताय नमः ।
ॐ नतसाधुजनाश्रयाय नमः ।
ॐ नरनारीगणोपेताय नमः ।
ॐ नगसानुकृताश्रमाय नमः ।
ॐ नममेत्यव्यययुताय नमः ॥

ॐ नवीनाय नमः ।
ॐ नष्टमानसाय नमः ।
ॐ नयनानन्ददाय नमः ।
ॐ नम्याय नमः ।
ॐ नामोच्चारणमुक्तिदाय नमः ।
ॐ नागस्वाम्यनुजाय नमः ।
ॐ नागसुन्दरज्येष्ठताङ्गताय नमः ।
ॐ नादबिन्दुकलाभिज्ञाय नमः ।
ॐ नादब्रह्मप्रतिष्ठिताय नमः ।
ॐ नादप्रियाय नमः ॥

ॐ नारदादिपूज्याय नमः ।
ॐ नामविवर्जिताय नमः ।

ॐ नामिने नमः ।
ॐ नामजपप्रीताय नमः ।
ॐ नास्तिकत्वविघातकृते नमः ।
ॐ नासाग्रन्यस्तदृशे नमः ।
ॐ नामब्रह्मातीताय नमः ।
ॐ निरञ्जनाय नमः ।
ॐ निरञ्जनाश्रयाय नमः ।
ॐ नित्यतृप्ताय नमः ॥ ३५०
ॐ निःश्रेयसप्रदाय नमः ।
ॐ निर्यत्नसिद्धनित्यश्रिये नमः ।
ॐ नित्यसिद्धस्वरूपदृशे नमः ।
ॐ निर्ममाय नमः ।
ॐ निरहङ्काराय नमः ।
ॐ निरवद्याय नमः ।
ॐ निराश्रयाय नमः ।
ॐ नित्यानन्दाय नमः ।
ॐ निरातङ्काय नमः ।
ॐ निष्प्रपञ्चाय नमः ॥

ॐ निरामयाय नमः ।
ॐ निर्मलाय नमः ।
ॐ निश्चलाय नमः ।
ॐ नित्याय नमः ।
ॐ निर्मोहाय नमः ।
ॐ निरुपाधिकाय नमः ।
ॐ निस्सङ्गाय नमः ।
ॐ निगमस्तुत्याय नमः ।
ॐ निरीहाय नमः ।
ॐ निरुपप्लवाय नमः ॥

ॐ नित्यशुद्धाय नमः ।
ॐ नित्यबुद्धाय नमः ।
ॐ नित्यमुक्ताय नमः ।

ॐ निरन्तराय नमः ।
ॐ निर्विकाराय नमः ।
ॐ निर्गुणात्मने नमः ।
ॐ निष्पापाय नमः ।
ॐ निष्परिग्रहाय नमः ।
ॐ निर्भवाय नमः ।
ॐ निस्स्तुतये नमः ॥

ॐ निघ्नाय नमः ।
ॐ निजानन्दैकनिर्भराय नमः ।
ॐ निग्रहानुग्रहसमाय नमः ।
ॐ निकृतिज्ञाय नमः ।
ॐ निदानविदे नमः ।
ॐ निर्ग्रन्थाय नमः ।
ॐ निर्नमस्काराय नमः ।
ॐ निस्तुलये नमः ।
ॐ निरयापहाय नमः ।
ॐ निर्वासनाय नमः ॥

ॐ निर्व्यसनाय नमः ।
ॐ निर्योगक्षेमचिन्तनाय नमः ।
ॐ निर्बीजध्यानसंवेद्याय नमः ।
ॐ निर्वादाय नमः ।
ॐ निश्शिरोरुहाय नमः ।
ॐ पञ्चाक्षरमनुध्येयाय नमः ।
ॐ पञ्चपातकनाशनाय नमः ।
ॐ पञ्चस्कन्धीमताभिज्ञाय नमः ।
ॐ पञ्चकोशविलक्षणाय नमः ।
ॐ पञ्चाग्निविद्यामार्गज्ञाय नमः ॥ ४००
ॐ पञ्चकृत्यपरायणाय नमः ।
ॐ पञ्चवक्राय नमः ।
ॐ पञ्चतपसे नमः ।
ॐ पञ्चताकारणोद्धराय नमः ।

ॐ पञ्चोपचारसम्पूज्याय नमः ।
ॐ पञ्चभूतविमर्दनाय नमः ।
ॐ पञ्चविंशतितत्त्वात्मने नमः ।
ॐ महापञ्चदशाक्षराय नमः ।
ॐ पराशरकुलोद्भूताय नमः ।
ॐ पण्डिताय नमः ॥

ॐ पण्डितप्रियाय नमः ।
ॐ परमेष्ठिने नमः ।
ॐ परेशानाय नमः ।
ॐ परिपूर्णाय नमः ।
ॐ परात्पराय नमः ।
ॐ परस्मै ज्योतिषे नमः ।
ॐ परस्मै धाम्ने नमः ।
ॐ परमात्मने नमः ।
ॐ परायणाय नमः ।
ॐ पतिव्रताभीष्टदायिने नमः ॥

ॐ पर्यङ्कस्थाय नमः ।
ॐ परार्थविदे नमः ।
ॐ पवित्रपादाय नमः ।
ॐ पापारये नमः ।
ॐ परार्थैकप्रयोजनाय नमः ।
ॐ पालीतीर्थतटोल्लासिने नमः ।
ॐ पाश्चात्यद्वीपविश्रुताय नमः ।
ॐ पित्रे नमः ।
ॐ पितृहिताय नमः ।
ॐ पित्तनाशकाय नमः ॥

ॐ पितृमोचकाय नमः ।
ॐ पितृव्यान्वेषिताय नमः ।
ॐ पीनाय नमः ।
ॐ पातालेशालयस्थिताय नमः ।
ॐ पुनर्वसूदिताय नमः ।

ॐ पुण्याय नमः ।
ॐ पुण्यकृते नमः ।
ॐ पुरुषोत्तमाय नमः ।
ॐ पुन्नागतरुवत्क्षेत्रिणे नमः ।
ॐ पुण्यापुण्यविवर्जिताय नमः ॥

ॐ पूतात्मने नमः ।
ॐ पृथुकप्रीताय नमः ।
ॐ पृथुदाय नमः ।
ॐ पुरोहिताय नमः ।
ॐ प्रतिमाकृतसान्निध्याय नमः ।
ॐ प्रतिग्रहपराङ्मुखाय नमः ।
ॐ प्रमादिवत्सरोद्भूताय नमः ।
ॐ प्रकृतिस्थाय नमः ।
ॐ प्रमाणविदे नमः ।
ॐ प्रतीकोपास्तिविषयाय नमः ॥ ४५०
ॐ प्रत्युत्तरविचक्षणाय नमः ।
ॐ प्रतीचे नमः ।
ॐ प्रशान्ताय नमः ।
ॐ प्रत्यक्षाय नमः ।
ॐ प्रश्रिताय नमः ।
ॐ प्रतिभानवते नमः ।
ॐ प्रदक्षिणाप्रीतमनसे नमः ।
ॐ प्रवालाद्रिसमाश्रयाय नमः ।
ॐ प्राच्यप्रतीच्यदेशीयविबुधाग्रण्यवन्दिताय नमः ।
ॐ प्रस्थानभेदसम्बोध्याय नमः ॥

ॐ प्रांशवे नमः ।
ॐ प्राणरोधकाय नमः ।
ॐ प्रसूतिदिनवृद्धस्त्रीदर्शितज्योतिराकृतये नमः ।
ॐ प्रार्थितार्थप्रदाय नमः ।
ॐ प्राज्ञाय नमः ।
ॐ प्रावारकनिगूहिताय नमः ।

ॐ प्रातःस्मर्तव्यचारित्राय नमः ।
ॐ प्राप्तप्राप्तव्यनिर्वृताय नमः ।
ॐ प्रायणस्मृतिसम्प्राप्याय नमः ।
ॐ प्रियहीनाय नमः ॥

ॐ प्रियंवदाय नमः ।
ॐ प्रेक्षावते नमः ।
ॐ प्रेष्यरहिताय नमः ।
ॐ फलभूताय नमः ।
ॐ फलप्रदाय नमः ।
ॐ बहुश्रुताय नमः ।
ॐ बहुमताय नमः ।
ॐ बहुपाकिने नमः ।
ॐ बहुप्रदाय नमः ।
ॐ बलवते नमः ॥

ॐ बन्धुमते नमः ।
ॐ बालरूपाय नमः ।
ॐ बाल्यविचेष्टिताय नमः ।
ॐ बालभानुप्रतीकाशाय नमः ।
ॐ बालसन्न्यासिशब्दिताय नमः ।
ॐ ब्रह्मचर्यतपोयोगश्रुतप्रज्ञासमन्विताय नमः ।
ॐ ब्रह्मण्याय नमः ।
ॐ ब्रह्मविदे नमः ।
ॐ ब्रह्मणे नमः ।
ॐ ब्रह्मसायुज्यदायकाय नमः ॥

ॐ ब्रह्मार्पितमनोबुद्धये नमः ।
ॐ ब्राह्मणस्वामिनामकाय नमः ।
ॐ ब्रह्मासनस्थिताय नमः ।
ॐ ब्रह्मसूत्रविदे नमः ।
ॐ भगवते नमः ।
ॐ भवाय नमः ।
ॐ भयकृते नमः ।

ॐ भयसंहर्त्रे नमः ।
ॐ भवादाय नमः ।
ॐ भक्तभाविताय नमः ॥ ५००
ॐ भारूपाय नमः ।
ॐ भावनाग्राह्याय नमः ।
ॐ भावज्ञाय नमः ।
ॐ भाग्यवर्धनाय नमः ।
ॐ भारतीय महाभाग्याय नमः ।
ॐ भारतख्यातिपोषकाय नमः ।
ॐ भारतोद्यज्ज्ञानदीपाय नमः ।
ॐ भावनाभेदकृन्तनाय नमः ।
ॐ भिदाशून्याय नमः ।
ॐ भिदाध्वंसिने नमः ॥

ॐ भावुकाय नमः ।
ॐ भिक्षुकेश्वराय नमः ।
ॐ भूतिदाय नमः ।
ॐ भूतिकृते नमः ।
ॐ भूमिनाथपूर्णांशसम्भवाय नमः ।
ॐ भौमब्रह्मणे नमः ।
ॐ भ्रमध्वंसिने नमः ।
ॐ भूहृत्क्षेत्रलक्षिताय नमः ।
ॐ भूतिभूषित सर्वाङ्गाय नमः ।
ॐ मङ्गलाय नमः ॥

ॐ मङ्गलप्रदाय नमः ।
ॐ मनसे नमः ।
ॐ बुद्धये नमः ।
ॐ अहङ्काराय नमः ।
ॐ प्रकृतये नमः ।
ॐ परस्मै पुंसे नमः ।
ॐ महाशक्तये नमः ।
ॐ महासिद्धये नमः ।

ॐ महोदाराय नमः ।
ॐ महाद्युतये नमः ॥

ॐ महाकर्त्रे नमः ।
ॐ महाभोक्त्रे नमः ।
ॐ महायोगिने नमः ।
ॐ महामतये नमः ।
ॐ महामान्याय नमः ।
ॐ महाभागाय नमः ।
ॐ महासेनमहांशजाय नमः ।
ॐ मर्यादाकृते नमः ।
ॐ महादेवाय नमः ।
ॐ महारूपिणे नमः ॥

ॐ महायशसे नमः ।
ॐ महोद्यमाय नमः ।
ॐ महोत्साहाय नमः ।
ॐ ममताग्रहपीडनाय नमः ।
ॐ महामन्त्राय नमः ।
ॐ महायन्त्राय नमः ।
ॐ महावाक्योपदेशकाय नमः ।
ॐ महावाक्यार्थतत्त्वज्ञाय नमः ।
ॐ महामोहनिवारकाय नमः ।
ॐ मायाविने नमः ॥ ५५०
ॐ मानदाय नमः ।
ॐ मानिने नमः ।
ॐ मातृमुक्तिविधायकाय नमः ।
ॐ मानावमानसाम्यात्मने नमः ।
ॐ मालूराधस्तपस्स्थिताय नमः ।
ॐ मधूकद्रुतलस्थायिने नमः ।
ॐ मातृमते नमः ।
ॐ मातृभक्तिमते नमः ।
ॐ मात्रालयप्रतिष्ठात्रे नमः ।

ॐ मार्गिताय नमः ॥

ॐ मार्गबान्धवाय नमः ।
ॐ मार्गणीयाय नमः ।
ॐ मार्गदर्शिने नमः ।
ॐ मार्गशीर्षकृतोदयाय नमः ।
ॐ मार्गितात्मने नमः ।
ॐ मार्गशून्याय नमः ।
ॐ मितभुजे नमः ।
ॐ मितसञ्चराय नमः ।
ॐ मितस्वप्नावबोधाय नमः ।
ॐ मिथ्याबाह्यनिरीक्षकाय नमः ॥

ॐ मुनये नमः ।
ॐ मुक्ताय नमः ।
ॐ मुक्तिदायिने नमः ।
ॐ मेधाविने नमः ।
ॐ मेध्यभोजनाय नमः ।
ॐ मौनव्याख्यानकृते नमः ।
ॐ मौनिने नमः ।
ॐ मौनभाषाविशारदाय नमः ।
ॐ मौनामौनद्वयातीताय नमः ।
ॐ मौनदाय नमः ॥

ॐ मौनिषुप्रियाय नमः ।
ॐ यज्ञकृते नमः ।
ॐ यज्ञभुजे नमः ।
ॐ यज्ञाय नमः ।
ॐ यजमानाय नमः ।
ॐ यथार्थविदे नमः ।
ॐ यतात्मने नमः ।
ॐ यतिसम्पूज्याय नमः ।
ॐ यतिप्राप्याय नमः ।
ॐ यशस्कराय नमः ॥

ॐ यमाद्यष्टाङ्गयोगज्ञाय नमः ।
ॐ यजुश्शाखिने नमः ।
ॐ यतीश्वराय नमः ।
ॐ यवनानुग्रहकराय नमः ।
ॐ यक्षाय नमः ।
ॐ यमनिषूदनाय नमः ।
ॐ यात्राविरहिताय नमः ।
ॐ यानानारूढाय नमः ।
ॐ याज्ञिकप्रियाय नमः ।
ॐ यातनानाशनाय नमः ॥ ६००
ॐ याच्नाहीनाय नमः ।
ॐ याचितदायकाय नमः ।
ॐ युक्तकृते नमः ।
ॐ युक्तभुजे नमः ।
ॐ युक्तस्वप्नबोधाय नमः ।
ॐ युगादिकृते नमः ।
ॐ योगीशाय नमः ।
ॐ योगपुरुषाय नमः ।
ॐ योगतत्त्वविवेचकाय नमः ।
ॐ योगासनाय नमः ॥

ॐ योगभूमिसमारोहणसाधकाय नमः ।
ॐ योगिगम्याय नमः ।
ॐ योगफलाय नमः ।
ॐ योगभ्रष्टशुभप्रदाय नमः ।
ॐ योगप्रशंसिने नमः ।
ॐ योगस्थाय नमः ।
ॐ योगक्षेमधुरन्धराय नमः ।
ॐ रक्षकाय नमः ।
ॐ रमणाय नमः ।
ॐ रम्याय नमः ॥

ॐ रमणीयाङ्गसंहतये नमः ।
ॐ रमेशक्लेशसन्दष्ट ज्योतिरक्लेशदर्शनाय नमः ।
ॐ रजोपहाय नमः ।
ॐ रजोमूर्तये नमः ।
ॐ रसिकाय नमः ।
ॐ रसशेवधये नमः ।
ॐ रहस्याय नमः ।
ॐ रञ्जनाय नमः ।
ॐ रस्याय नमः ।
ॐ रत्नगर्भाय नमः ॥

ॐ रसोदयाय नमः ।
ॐ राजविद्यागुरवे नमः ।
ॐ राजविद्याविदे नमः ।
ॐ राजमानिताय नमः ।
ॐ राजसाहारनिर्मुक्ताय नमः ।
ॐ राजसज्ञानदूरगाय नमः ।
ॐ रागद्वेषविनिर्मुक्ताय नमः ।
ॐ रसालाश्रमकोकिलाय नमः ।
ॐ रामाभिरामाय नमः ।
ॐ राजश्रिये नमः ॥

ॐ राज्ञे नमः ।
ॐ राज्यहितङ्कराय नमः ।
ॐ राजभोगप्रदाय नमः ।
ॐ राष्ट्रभाषाविदे नमः ।
ॐ राजवल्लभाय नमः ।
ॐ रुदितद्वेषणाय नमः ।
ॐ रुद्राय नमः ।
ॐ लक्ष्मीवते नमः ।
ॐ लक्ष्मीवर्धनाय नमः ।
ॐ लज्जालवे नमः ॥ ६५०
ॐ ललिताय नमः ।

ॐ लब्धलब्धव्याय नमः ।
ॐ लघुसिद्धिदाय नमः ।
ॐ लयविदे नमः ।
ॐ लब्धकामौघाय नमः ।
ॐ लाभालाभसमाशयाय नमः ।
ॐ लयाधिष्ठानतत्त्वज्ञाय नमः ।
ॐ लयपूर्वसमाधिमते नमः ।
ॐ लास्यप्रियाय नमः ।
ॐ लिङ्गरूपिणे नमः ॥

ॐ लिङ्गोत्थाय नमः ।
ॐ लिङ्गवर्जिताय नमः ।
ॐ लिपिलेखचणाय नमः ।
ॐ लोकशिक्षकाय नमः ।
ॐ लोकरक्षकाय नमः ।
ॐ लोकायतमताभिज्ञाय नमः ।
ॐ लोकवार्ताविवर्जिताय नमः ।
ॐ लोकोदासीनभावस्थाय नमः ।
ॐ लोकोत्तरगुणोत्तराय नमः ।
ॐ लोकाध्यक्षाय नमः ।
ॐ लोकपूज्याय नमः ।
ॐ लोकासारत्वबोधकाय नमः ।
ॐ लोकाकर्षणशक्तात्मशक्तिमत् कान्तपर्वताय नमः ।
ॐ लोकानुत्सादकाय नमः ।
ॐ लोकप्रमाणाय नमः ।
ॐ लोकसङ्ग्रहिणे नमः ।
ॐ लोकबोधप्रकाशार्थ शोणोद्यज्ज्ञानभास्कराय नमः ।
ॐ वरिष्ठाय नमः ।
ॐ वरदाय नमः ।
ॐ वक्रे नमः ।
ॐ वङ्गदेश्य जनाश्रयाय नमः ।
ॐ वन्दारुजनमन्दाराय नमः ।

ॐ वर्तमानैककालविदे नमः ।
ॐ वनवासरसाभिज्ञाय नमः ।
ॐ वलित्रयविभूषिताय नमः ।
ॐ वसुमते नमः ।
ॐ वस्तुतत्त्वज्ञाय नमः ।
ॐ वन्द्याय नमः ।
ॐ वत्सतरीप्रियाय नमः ।
ॐ वर्णाश्रमपरित्रात्रे नमः ॥

ॐ वर्णाश्रममतातिगाय नमः ।
ॐ वाक्यज्ञाय नमः ।
ॐ वाक्यकुशलाय नमः ।
ॐ वाङ्मनोबुद्ध्यगोचराय नमः ।
ॐ वाद्यगीतप्रियाय नमः ।
ॐ वाजश्रवसे नमः ।
ॐ वापीप्रतिष्ठकाय नमः ।
ॐ वाहनागारनिष्ठावते नमः ।
ॐ वाजिमेधफलप्रदाय नमः ।
ॐ वक्षोदक्षिणभागस्थ हृदयस्थानदर्शकाय नमः ॥ ७००
ॐ वचद्भूमन्त्रसंसेव्याय नमः ।
ॐ विचारैकोपदेशकृते नमः ।
ॐ विचारमात्रनिरताय नमः ।
ॐ विवेकिजनतादृताय नमः ।
ॐ विदितात्मने नमः ।
ॐ विधेयात्मने नमः ।
ॐ विस्मितेशादिवीक्षिताय नमः ।
ॐ विरूपाक्षगुहावासिने नमः ।
ॐ विश्वात्मने नमः ।
ॐ विश्वभुजे नमः ।
ॐ विभवे नमः ।
ॐ विविक्तसेविने नमः ।
ॐ विघ्नेशचैत्यप्राकारसंस्थिताय नमः ।

ॐ विध्यदृष्टमहोदर्शिने नमः ।
ॐ विज्ञानानन्दसुन्दराय नमः ।
ॐ विघसाशिने नमः ।
ॐ विशुद्धात्मने नमः ।
ॐ विपर्यासनिरासकाय नमः ।
ॐ विभूतिसितफालाढ्याय नमः ।
ॐ विरोधोक्तिविनाकृताय नमः ।
ॐ विश्वम्भराय नमः ।
ॐ विश्ववैद्याय नमः ।
ॐ विश्वास्याय नमः ।
ॐ विस्मयान्विताय नमः ।
ॐ वीणागेयाय नमः ।
ॐ वीतमायाय नमः ।
ॐ वीर्यवते नमः ।
ॐ वीतसंशयाय नमः ।
ॐ वृद्धिह्रासविनाभूताय नमः ।
ॐ वृद्धाय नमः ॥

ॐ वृत्तिनिरोधकाय नमः ।
ॐ वृत्तिदाय नमः ।
ॐ वृत्तिबोधेद्धाय नमः ।
ॐ वेणुवाद्यवशंवदाय नमः ।
ॐ वेदवेदान्ततत्त्वज्ञाय नमः ।
ॐ वेषदोषप्रकाशकाय नमः ।
ॐ व्यक्ताव्यक्तस्वरूपज्ञाय नमः ।
ॐ व्यङ्ग्यवाक्यप्रयोगविदे नमः ।
ॐ व्याप्ताखिलाय नमः ।
ॐ व्यवस्थाकृते नमः ॥

ॐ व्यवसायविबोधकाय नमः ।
ॐ वैज्ञानिकाग्रण्यै नमः ।
ॐ वैश्वानराय नमः ।
ॐ व्याघ्राजिनस्थिताय नमः ।

ॐ शरण्याय नमः ।
ॐ शर्मदाय नमः ।
ॐ शक्तिपातबुद्धाय नमः ।
ॐ शमान्विताय नमः ।
ॐ शरीरवद्भासमानाय नमः ।
ॐ शर्मण्यजनवन्दिताय नमः ॥ ७५०
ॐ शास्त्रजालमहारण्यवृथाटननिषेधकाय नमः ।
ॐ शास्त्राभ्यासफलीभूतज्ञानविज्ञानतत्पराय नमः ।
ॐ शास्त्रोल्लङ्घनविद्वेषिणे नमः ।
ॐ शास्त्रमार्गाविलङ्घनाय नमः ।
ॐ शान्तात्मने नमः ।
ॐ शान्तिदाय नमः ।
ॐ शान्तिधनाय नमः ।
ॐ शान्तोपदेशकाय नमः ।
ॐ शाण्डिल्योपास्तिलक्ष्यार्थाय नमः ।
ॐ शास्त्रयोनये नमः ॥

ॐ प्रजापतये नमः ।
ॐ शिवङ्कराय नमः ।
ॐ शिवतमाय नमः ।
ॐ शिष्टेष्टाय नमः ।
ॐ शिष्टपूजिताय नमः ।
ॐ शिवप्रकाशसन्तुष्टाय नमः ।
ॐ शिवाद्वैतप्रतिष्ठिताय नमः ।
ॐ शिवगङ्गातताकस्थाय नमः ।
ॐ शिवज्ञानप्रदायकाय नमः ।
ॐ शीताचलप्रान्त्यपूज्याय नमः ॥

ॐ शीप्रातीरजनाश्रयाय नमः ।
ॐ शुभाशुभपरित्यागिने नमः ।
ॐ शुभाशुभविमत्सराय नमः ।
ॐ शुक्लकृष्णगतिज्ञानिने नमः ।
ॐ शुभंयवे नमः ।

ॐ शिशिरात्मकाय नमः ।
ॐ शुकवत् जन्मसंसिद्धाय नमः ।
ॐ शेषाद्रिस्वामिवत्सलाय नमः ।
ॐ शैववैष्णवशाक्तादि विरोधप्रतिरोधकाय नमः ।
ॐ शृङ्गारादि रसालम्बाय नमः ॥

ॐ शृङ्गाररसविप्रियाय नमः ।
ॐ श्रवणाध्यर्थतत्त्वज्ञाय नमः ।
ॐ श्रवणानन्दभाषिताय नमः ।
ॐ शोणेशालयसञ्चारिणे नमः ।
ॐ शोणेशाय नमः ।
ॐ शोणतीर्थविदे नमः ।
ॐ शोकमोहाद्यसंस्पृष्टाय नमः ।
ॐ शोणक्षेत्राधिदैवताय नमः ।
ॐ श्रीदाय नमः ।
ॐ श्रीशाय नमः ॥

ॐ श्रीनिवासाय नमः ।
ॐ श्रीकण्ठमततत्त्वविदे नमः ।
ॐ श्रीविद्यामन्त्रतत्त्वज्ञाय नमः ।
ॐ श्रीवैष्णवमतप्रियाय नमः ।
ॐ श्रुतितात्पर्यनिर्वक्रे नमः ।
ॐ श्रुतमात्रावधारणाय नमः ।
ॐ श्रुतश्रोतव्यसन्तुष्टाय नमः ।
ॐ श्रौतमार्गसमर्थकाय नमः ।
ॐ षडध्वध्वान्तविध्वंसिने नमः ।
ॐ षडूर्मिभयभञ्जनाय नमः ॥ ८००
ॐ षड्ग्रन्थिभेदचतुराय नमः ।
ॐ षड्गुणिने नमः ।
ॐ षड्प्रमाणवते नमः ।
ॐ षट्कोणमध्यनिलयाय नमः ।
ॐ षडरिघ्नाय नमः ।
ॐ षडाश्रयाय नमः ।

ॐ षण्डत्वघ्नाय नमः ।
ॐ षडाधारनिर्ध्याताय नमः ।
ॐ षडानादिविदे नमः ।
ॐ सर्वज्ञाय नमः ॥

ॐ सर्वविदे नमः ।
ॐ सर्वाय नमः ।
ॐ सार्वाय नमः ।
ॐ सर्वमनस्स्थिताय नमः ।
ॐ सदसत् निर्णयज्ञानिने नमः ।
ॐ सर्वभूतसमाशयाय नमः ।
ॐ सर्वश्रुतये नमः ।
ॐ सर्वचक्षुषे नमः ।
ॐ सर्वाननकरादिमते नमः ।
ॐ सर्वेन्द्रियगुणाभासाय नमः ॥

ॐ सर्वसम्बन्धवर्जिताय नमः ।
ॐ सर्वभृते नमः ।
ॐ सर्वकृते नमः ।
ॐ सर्वहराय नमः ।
ॐ सर्वहितेरताय नमः ।
ॐ सर्वारम्भपरित्यागिने नमः ।
ॐ सगुणध्यायितारकाय नमः ।
ॐ सर्वभूतनिशाबुद्धाय नमः ।
ॐ सर्वजागरनिद्रिताय नमः ।
ॐ सर्वाश्चर्यमयाय नमः ॥

ॐ सभ्याय नमः ।
ॐ सङ्कल्पघ्नाय नमः ।
ॐ सदातनाय नमः ।
ॐ सर्गादिमध्यनिधनाय नमः ।
ॐ सकृत्स्मृतिविमुक्तिदाय नमः ।
ॐ संयमिने नमः ।
ॐ सत्यसन्धाय नमः ।

ॐ संस्कार परिवर्जिताय नमः ।
ॐ समाय नमः ।
ॐ समविभक्ताङ्गाय नमः ॥

ॐ समदृशे नमः ।
ॐ समसंस्थिताय नमः ।
ॐ समर्थाय नमः ।
ॐ समरद्वेषिणे नमः ।
ॐ समर्यादाय नमः ।
ॐ समाहिताय नमः ।
ॐ समयज्ञाय नमः ।
ॐ सदानन्दाय नमः ।
ॐ समाहृतनिजेन्द्रियाय नमः ।
ॐ सत्तासंविन्मयज्योतिषे नमः ॥ ८५०
ॐ सम्प्रदायप्रवर्तकाय नमः ।
ॐ समस्तवृत्तिमूलाहंवृत्तिनाशोपदेशकाय नमः ।
ॐ सम्राजे नमः ।
ॐ समृद्धाय नमः ।
ॐ सम्बुद्धाय नमः ।
ॐ सर्वश्रुतिमनोहराय नमः ।
ॐ सरळाय नमः ।
ॐ सरसाय नमः ।
ॐ सर्वरसाय नमः ।
ॐ सर्वानुभूतियुजे नमः ॥

ॐ सर्वेश्वराय नमः ।
ॐ सर्वनिधये नमः ।
ॐ सर्वात्मने नमः ।
ॐ सर्वसाधकाय नमः ।
ॐ सहजप्राप्तकर्मानुष्ठानत्यागनिषेधकाय नमः ।
ॐ सहिष्णवे नमः ।
ॐ सात्त्विकाहाराय नमः ।
ॐ सात्त्विकज्ञानिवीक्षिताय नमः ।

ॐ सत्त्वाधिकमनोबुद्धिसुखधैर्यविवर्धकाय नमः ।
ॐ सात्त्विकत्यागयोगज्ञाय नमः ॥

ॐ सात्त्विकाराध्यवैभवाय नमः ।
ॐ सार्धषोडशवर्षाप्तपारिव्राज्याय नमः ।
ॐ विरक्तधिये नमः ।
ॐ सामगानप्रियाय नमः ।
ॐ साम्यवैषम्यमतिकृन्तनाय नमः ।
ॐ साधिताखिलसिद्धीशाय नमः ।
ॐ सामविदे नमः ।
ॐ सामगायनाय नमः ।
ॐ सिद्धार्थाय नमः ।
ॐ सिद्धसङ्कल्पाय नमः ॥

ॐ सिद्धिदाय नमः ।
ॐ सिद्धसाधनाय नमः ।
ॐ सिध्यसिद्धिसमाय नमः ।
ॐ सिद्धाय नमः ।
ॐ सिद्धसङ्घसमर्चिताय नमः ।
ॐ सिसाधयिषुलोकेड्याय नमः ।
ॐ सहायाम्बासहायवते नमः ।
ॐ सुन्दराय नमः ।
ॐ सुन्दरक्षेत्रविद्याभ्यासविलासभृते नमः ।
ॐ सुन्दरेश्वरलीलाकृते नमः ॥

ॐ सुन्दरानन्दवर्धनाय नमः ।
ॐ सुरर्षिसन्नुताय नमः ।
ॐ सूक्ष्माय नमः ।
ॐ सूरिदृश्यपदस्थिताय नमः ।
ॐ सुदर्शनाय नमः ।
ॐ सुहृदे नमः ।
ॐ सूरये नमः ।
ॐ सूनृतोक्तिवदावदाय नमः ।
ॐ सूत्रविदे नमः ।

ॐ सूत्रकृते नमः ॥ ९००
ॐ सूत्राय नमः ।
ॐ सृष्टिवैतथ्यबोधकाय नमः ।
ॐ सृष्टिवाक्यमहावाक्यैक्यकण्ठ्यप्रतिपादकाय नमः ।
ॐ सृष्टिहेतुमनोनाशिने नमः ।
ॐ सृष्ट्यधिष्ठाननिष्ठिताय नमः ।
ॐ स्रक्चन्दनादिविषयविरागिणे नमः ।
ॐ स्वजनप्रियाय नमः ।
ॐ सेवानम्रस्वभक्तौघसद्योमुक्तिप्रदायकाय नमः ।
ॐ सोमसूर्याग्न्यप्रकाश्यस्वप्रकाशस्वरूपदृशे नमः ।
ॐ सौन्दर्याम्बातपस्सम्पत्परीपाकफलायिताय नमः ॥

ॐ सौहित्यविमुखाय नमः ।
ॐ स्कन्दाश्रमवासकुतूहलिने नमः ।
ॐ स्कन्दालयतपोनिष्ठाय नमः ।
ॐ स्तव्यस्तावकवर्जिताय नमः ।
ॐ सहस्रस्तम्भसंयुक्त मण्डपान्तरमाश्रिताय नमः ।
ॐ स्तैन्यस्तेनाय नमः ।
ॐ स्तोत्रशास्त्रगेयाय नमः ।
ॐ स्मृतिकराय नमः ।
ॐ स्मृतये नमः ।
ॐ सामरस्यविधानज्ञाय नमः ॥

ॐ सङ्घसौभ्रात्रबोधकाय नमः ।
ॐ स्वभावभद्राय नमः ।
ॐ मध्यस्थाय नमः ।
ॐ स्त्रीसन्न्यासविधायकाय नमः ।
ॐ स्तिमितोदधिवज्ज्ञानशक्तिपूरितविग्रहाय नमः ।
ॐ स्वात्मतत्त्वसुखस्फूर्तितुन्दिलस्वस्वरूपकाय नमः ।
ॐ स्वस्वधर्मरतश्लाघिने नमः ।
ॐ स्वभुवे नमः ।
ॐ स्वच्छन्दचेष्टिताय नमः ।
ॐ स्वस्वरूपपरिज्ञानपरामृतपदस्थिताय नमः ॥

ॐ स्वाध्यायज्ञानयज्ञेज्याय नमः ।
ॐ स्वतस्सिद्धस्वरूपदृशे नमः ।
ॐ स्वस्तिकृते नमः ।
ॐ स्वस्तिभुजे नमः ।
ॐ स्वामिने नमः ।
ॐ स्वापजाग्रद्विवर्जिताय नमः ।
ॐ हन्तृहन्तव्यताशून्यशुद्धस्वात्मोपदेशकाय नमः ।
ॐ हस्तपादाद्यसङ्ग्राह्यनिर्लिप्तपरमार्थदृशे नमः ।
ॐ हत्यादिपापशमनाय नमः ।
ॐ हानिवृद्धिविवर्जिताय नमः ॥

ॐ हितकृते नमः ।
ॐ हूणदेशीयजनवर्णित वैभवाय नमः ।
ॐ हृदयब्रह्मतत्त्वज्ञाय नमः ।
ॐ हृदयान्वेषदेशनाय नमः ।
ॐ हृदयस्थाय नमः ।
ॐ हृदयाकाशस्वरूपिणे नमः ।
ॐ हृद्गुहाशयाय नमः ।
ॐ हार्दाकाशान्तर्गतबाह्याकाशादिवस्तुदृशे नमः ।
ॐ हृदयस्थानतत्त्वज्ञाय नमः ।
ॐ हृदहंनाश पण्डिताय नमः ॥ ९५०
ॐ हेयोपादेयरहिताय नमः ।
ॐ हेमन्तर्तुकृतोदयाय नमः ।
ॐ हरिब्रह्मेन्द्रदुष्प्रापस्वाराज्योर्जितशासनाय नमः ।
ॐ हतासुरप्रकृतिकाय नमः ।
ॐ हंसाय नमः ।
ॐ हृद्याय नमः ।
ॐ हिरण्मयाय नमः ।
ॐ हार्दविद्याफलीभूताय नमः ।
ॐ हार्दसन्तमसापहाय नमः ।
ॐ सेतवे नमः ॥

ॐ सीम्ने नमः ।

ॐ समुद्राय नमः ।
ॐ समाभ्यधिकवर्जिताय नमः ।
ॐ पुराणाय नमः ।
ॐ पुरुषाय नमः ।
ॐ पूर्णाय नमः ।
ॐ अनन्तरूपाय नमः ।
ॐ सनातनाय नमः ।
ॐ ज्योतिषे नमः ।
ॐ प्रकाशाय नमः ॥

ॐ प्रथिताय नमः ।
ॐ स्वयंभानाय नमः ।
ॐ स्वयंप्रभवे नमः ।
ॐ सत्याय नमः ।
ॐ ज्ञानाय नमः ।
ॐ सुखाय नमः ।
ॐ स्वस्थाय नमः ।
ॐ स्वानुभवे नमः ।
ॐ परदैवताय नमः ।
ॐ महर्षये नमः ॥

ॐ महाग्रासाय नमः ।
ॐ महात्मने नमः ।
ॐ भगवते नमः ।
ॐ वशिने नमः ।
ॐ अहमर्थाय नमः ।
ॐ अप्रमेयात्मने नमः ।
ॐ तत्त्वाय नमः ।
ॐ उत्तम निर्वाणाय नमः ।
ॐ अनाख्यवस्तुने नमः ।
ॐ मुक्तात्मने नमः ।
ॐ बन्धमुक्तिविवर्जिताय नमः ।
ॐ अदृश्याय नमः ।

ॐ दृश्यनेत्रे नमः ।
ॐ मूलाचार्याय नमः ।
ॐ सुखासनाय नमः ।
ॐ अन्तर्यामिने नमः ।
ॐ पारशून्याय नमः ।
ॐ भूम्ने नमः ।
ॐ भोजयित्रे नमः ।
ॐ रसाय नमः ॥ १०००

उपसंहारः -
कोऽहं मार्ग धनुष्पाणिः नाहं तत्त्व सुदर्शनः ।
सोऽहं बोध महाशङ्खो भगवान् रमणोऽवतु ॥ १॥

इति ते नामसहस्रं रमणस्य महात्मनः ।
कथितं कृपया देवि गोप्याद् गोप्यतरं मया ॥ २॥

य इदं नामसहस्रं भक्त्या पठति मानवः ।
तस्य मुक्तिर्यत्नेन सिध्यत्येव न संशयः ॥ ३॥

विद्यार्थी लभते विद्यां विवाहार्थी गृही भवेत् ।
वैराग्य कामो लभते वैराग्यं भवतारकम् ॥ ४॥

येन येन च यो योऽर्थी स स तं तं समश्नुते ।
सर्व पापविनिर्मुक्तः परं निर्वाणमाप्नुयात् ॥ ५॥

दुर्देश कालोत्थ दुरामयार्ताः
  दौर्भाग्य तापत्रय सन्निरुद्धाः ।
नराः पठन्तो रमणस्य नाम
  साहस्रमीयुः सुखमस्त दुःखम् ॥ ६॥

इति श्री गौतमऋषि प्रोक्तं
श्री रमणसहस्रनामस्तोत्राधार नामावलिः सम्पूर्णा ॥

॥ शुभमस्तु ॥

Encoded and Proofread by Sunder Hattangadi

Proofread by Lingeshwara Rao (from original in Telugu)

Text composed by Shri LakShmanasharmana.
This work is published by Sri Ramanasramam
www.sriramanamaharshi.org
It has been approved to be posted
on sanskritdocuments.org by permission of
Sri V.S. Ramanan, President, Sri Ramanasramam.

*Shri Ramanamaharshi Sahasranamavali*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*